# संस्कृतबालादर्शे चतुर्दशः पाठः १४

## ( भ्राता स्वसा च )

ह्यः। श्वः। परश्वः। अद्य।

वार्ता। तर्जनी।

अत्र एकः बालकः एका बालिका च तिष्ठतः।तौ पाठालयात् आगच्छताम्।सा बालिका तस्य बालकस्य स्वसा। तौ किं कुरुतः ? तौ संल्लपतः॥

स बालकः ह्यः पाठं न अपठत्। उपाध्यायः तम् अताडयत्। तां वार्तां तस्य स्वसा पित्रे अकथयत्। पिता पुत्रं अभर्त्सयत। तेन कुपितः स बलकः स्वसारम् अनिन्दत्। सा भ्रातरं तर्जन्या तर्जयते॥

राम ! अपि त्वम् अद्य प्रातः स्वसुः गृहम् अगच्छः ? आर्य ! अहं न अगच्छम्। श्वः परश्वो वा गमिष्यामि। ह्यः सायं त्वं किम् अकरोः ह्यः सायम् अहं पित्रा सह विपणिम् अगच्छम्॥

**क) प्रश्नाः**

१. अत्र कौ तिष्ठतः ? अत्र एकः बालकः एका बालिका च तिष्ठतः।

२. तौ कुतः आगच्छताम् ? तौ पाठालयात् आगच्छताम्।

३. सा बालिका का ? सा बालिका तस्य बालकस्य स्वसा।

४. कः ह्यः पाठं न अपठत्? स बालकः ह्यः पाठं न अपठत्।

५. कः तम् अताडयत् ? उपाध्यायः तम् अताडयत्।

६. तां वार्तां का पित्रे अकथयत् ? तां वार्तां तस्य स्वसा पित्रे अकथयत्।

७. कः पुत्रमभर्त्सयत ? पिता पुत्रं अभर्त्सयत।

८. तेन कुपितः स बालकः किम् अकरोत् ? तेन कुपितः स बालकः स्वसारम् अनिन्दत्।

९. सा भातरं किं करोति ? सा भ्रातरं तर्जन्या तर्जयते।

१०. त्वं कदा स्वसुः गृहं गमिष्यसि ? अहं श्वः परश्वो वा गमिष्यामि।

११. त्वं कदा विपणिमगच्छः ? अहं ह्यः सायं पित्रा सह विपणिमगच्छम्।

**ख) " एतद् " शब्दस्य लिङ्गत्रयेऽपि प्रथमा विभक्ति रूपाणि - -**

| | | | |
|---|---|---|---|
| पुंलिङ्गे - | एषः | एतौ | एते |
| स्त्रीलिङ्गे - | एषा | एते | एताः |
| नपुंसकलिङ्गे - | एतत् | एते | एतानि |

**ग) " एतद् " शब्दस्य रूपैः वाक्यानि पूरयत - -**

१। ____ मम भ्राता। *एशः* मम भ्राता।

२। ____ तव सखा। *एषा* तव स्वसा।

३। ____ पुस्तकम्। *एतत्* पुस्तकम्।

४। ____ कपी। *एतौ* कपी।

५। ________ कशे। एते कशे।

६। _____ फले। *एते* फले।

७। ____ धेनवः। *एताः* धेनवः।

८। _____ तरवः। *एते* तरवः।

९। ____ नीडानि। *एतानि* नीडानि।

## शब्दसंग्रहः śabdasaṅgrahaḥ = Vocabulary

ह्यः hyaḥ = *in* yesterday

श्वः śvaḥ = *in* tomorrow

परश्वः paraśvaḥ = *in* day after tomorrow

अद्य adya = *in* today

वार्ता vārtā = *f* news

तर्जनी tarjanī = *f* fore finger

बालकः bālakaḥ = *m* boy

गमिष्यामि gamiṣyāmi = *P* (I) shall go

बालिका bālikā= *f* girl

संल्लपतः saṁllapataḥ =*P* converse

अकथयत् akathayat = = *P* told

अभर्त्सयत abhartsayata = *A.* threatened

अनिन्दत् anindat = *P* abused, blamed

तर्जयते tarjayate = A. threatens

विपणिः vipaṇiḥ = *f* market